नामलिंगानुशासनम्

अमरकोषो[illegible]

५८[illegible]५

अ॰ को॰ १

ॐ श्रीगणेशाय नमः ॐ रिरंसयाद्दिवानिशि वयोस्तिलकायमाने गोरोचनारुचिललाट वि
लोचनेनः अन्योन्यगाढपरिरंभनिपीडनेन पिंडीभवन्बहिरिव स्फुरितोनुरागः ॐ यस्य
ज्ञानदयासिंधोरगाधस्यानघागुणाः सेव्यतामक्षयोधीराः सश्रियेचामृतायच समा
हृतान्यतंत्राणिसंक्षिप्तैः प्रतिसंस्कृतैः संपूर्णमुच्यतेवर्गैर्नामलिंगानुशासनम् प्राय
शोरूपभेदेनसाहचर्याच्चकुत्रचित् स्त्रीपुंनपुंसकंज्ञेयंतद्विशेषविधेःक्वचित् भेदाख्याना
यनद्वंद्वोनैकशेषोनसंकरः कृतोत्रभिन्नलिंगानामनुक्तानांक्रमादृते त्रिलिंग्यांत्रिष्वितिप
दंमिथुनेतुद्वयोरिति निषिद्धलिंगंशेषार्थंत्वंताथादिनपूर्वभाक् स्वरव्ययंस्वर्गनाकत्रि
दिवत्रिदशालयाः सुरलोकोद्योदिवौद्वेस्त्रियांक्लीबेत्रिविष्टपम् ४ अमरानिर्जरादेवा
स्त्रिदशाविबुधाःसुराः सुपर्वाणःसुमनसस्त्रिदिवेशादिवौकसः आदितेयादिविषदो
लेखाअदितिनंदनाः आदित्याऋभवोस्वप्नाअमर्त्याअमृतांधसः बर्हिर्मुखाःक्रतुभुजो

गीर्वाणा दानवारयः वृंदारका दैवतानि पुंसि वा देवताः स्त्रियाम् ८ आदित्यविश्ववसव
स्तुषिताभास्वरानिलाः महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ९ विद्याधराप्सरोयक्ष
रक्षोगंधर्वकिन्नराः पिशाचो गुह्यकः सिद्धो भूतोमी देवयोनयः १० असुरा दैत्यदैतेयदनु
जेंद्रारिदानवाः शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ११ सर्वज्ञः सुगतो बुद्धो धर्मराज
स्तथागतः समंतभद्रो भगवान्मारजिल्लोकजिज्जिनः षडभिज्ञो दशबलोऽद्वयवादी विनायकः
मुनीन्द्रः श्रीघनः शास्ता मुनिः १३ शाक्यमुनिस्तु यः स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिः
श्च सः गौतमश्चार्कबंधुश्च मायादेवीसुतश्च सः १ सिद्धार्थो वीतरागोऽर्हं केवली तीर्थकृज्जिना
स्याद्वादी निर्ग्रंथो निर्ग्रंथऋषिरित्यपि ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः हिरण्य
गर्भो लोकेशः स्वयंभूश्चतुराननः धाताब्जयोनिर्द्रुहिणो विरिंचिः कमलासनः स्रष्टा प्रजाप
तिर्वेधा विधाता विश्वसृड्विधिः शांतानंदः शतधृतिः स्थविरो हंसवाहनः १५ विष्णुर्नारायणः

ग्रं॰
को॰
१

कृष्णोवैकुंठोविष्टरश्रवः दामोदरोहृषीकेशः केशवोमाधवः स्वभूः दैत्यारिः पुंडरीकाक्षोगो
विंदोगरुडध्वजः पीतांवरोच्युतः शार्ङ्गीविष्वक्सेनोजनार्दनः उपेंद्रइंद्रावरजश्चक्रपाणिश्चतु
र्भुजः पद्मनाभोमधुरिपुर्वासुदेवस्त्रिविक्रमः देवकीनंदनः शौरिः श्रीपतिः पुरुषोत्तमः वन
मालीवलिध्वंसीकंसारातिरधोक्षजः विश्वंभरः कैटभजिद्विधुः श्रीवत्सलांछनः पुराणपुरु
षोदाशार्ङ्गीब्धिशायीगदाग्रजः जलशायीविश्वरूपोमुकुंदोमुरमर्दनः २० मेघकेशोहरिर्हेषा
कपिस्थ वसुदेवोस्यजनकः सएवानकदुंदुभिः वलभद्रः प्रलंबघ्नोवलदेवोच्युताग्रजः रेवती
रमणोरामः कामपालोहलायुधः नीलांवरोरौहिणेयस्तालांकोमुसलीहली संकर्षणः सी
रपाणिः कालिंदीभेदनोवलः २ सात्वतोपिद्वैत्रसखोल्कयोरतिवल्लभः मदनोमन्मथो
मारः प्रद्युम्नोमीनकेतनः कंदर्पोदर्पकोनंगः कामः पंचशरः स्मरः शम्बरारिर्मनसिजः कुसु
मेषुरनन्यजः पुष्पधन्वारतिपतिर्मकरध्वजआत्मभूः १९ चैत्रसखः शृंगारयोनिः पुष्पकेतु।

ष्णेतिभामहरिः ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्धउषापतिः ४ विष्वक्सेनात्मजात्मजः लक्ष्मी ः
पद्मालयापद्मा: कमलाश्रीर्हरिप्रिया मारमोदधिजासंपद्हरिणीलोकविश्रुतः ईंदिरा।
लोकमातामारमामंगलदेवता भार्गवीलोकजननीक्षीराब्धितनयातथा ।५ शंखोल
क्ष्मीपतेःपंचजन्यः । चक्रंसुदर्शनः । कौमोदकीगदा खड्गोनंदकः । कौस्तुभोमणिः
गरुत्मांगरुडस्तार्क्ष्योवैनतेयः खगेश्वरः नागांतकोविष्णुरथः सुपर्णः पन्नगाशनः ६ शं
भुरीशः पशुपतिः शिवःशूलीमहेश्वरः ईश्वरः शर्वईशानः शंकरश्चंद्रशेखरः भूतेशः ख
ण्डपरशुर्गिरीशोगिरिशोमृडः मृत्युंजयः कृत्तिवासाः पिनाकीप्रमथाधिपः उग्रः कपर्दीश्री।
कंठः शितिकंठः कपालभृत् वामदेवोमहादेवोविरूपाक्षस्त्रिलोचनः कृशानुरेताः सर्वज्ञो
धूर्जटिर्नीललोहितः हरः स्मरहरोभर्गस्त्र्यंबकस्त्रिपुरांतकः गंगाधरोंधकरिपुः क्रतुध्वंसी
वृषध्वजः व्योमकेशोभवोभीमः स्थाणुरुद्रउमापति महानटोष्टमूर्तिश्चाहिर्बुध्न्योघस्मषाक

अ॰ को॰ ३
3

पिः भैरवः शितिविष्टब्गजास्त्वहरस्तथा ५५ कपर्दोऽस्य जटाजूटः १ पिनाकोऽजगवं धनुः २
प्रमथाः स्युः पारिषदा १ गणाः प्रमि ब्राह्मीत्याद्यास्तु मातरः । विभूतिर्भूतिरैश्वर्यमणिमादि
कमष्टधा ४ उमा कात्यायनी गौरी काली हैमवतीश्वरी शिवा भवानी रुद्राणी शर्वाणी स
र्वमंगला अपर्णा पार्वती दुर्गा मृडानी चंडिकांबिका जगन्माता भैरवी च सती दाक्षायणीत
था योगनिद्रा महामाया गिरिजा मेनकात्मजा गणांबिका स्वदेवी ह्यार्या च ऊलनायका ।
विनायको विघ्नराजद्वैमातुरगणाधिपाः अप्येकदंतहेरंबलंबोदरगजाननाः गांगेयाखुर
थो ९ नंदीनंदिनो नंदिकेश्वरे ३ कार्तिकेयो महासेनः शरजन्मा षडाननः पार्वतीनंदनः
स्कंदः सेनानीरग्निभूर्गुहः बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः षाण्मातुरः शक्तिधरः कु
मारः क्रौंचदारणः ८ पावकिश्च शृंगी भृंगिरिटिः कर्णमोटी तु चामुंडा चर्ममुंडा तु चर्चिका ४ इंद्रो
मरुत्वान्मघवा बिडौजाः पाकशासनः वृद्धश्रवाः शुनासीरः पुरुहूतः पुरंदरः जिष्णुर्लेखर्षभः

शक्रः शतमन्युर्दिवस्पतिः सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा वास्तोष्पतिः सुरपतिर्ब
लारातिः शचीपतिः जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः संक्रन्दनो दुश्च्यवनस्तुराषा
ण्मेघवाहनः आखण्डलः सहस्राक्ष ऋभुक्षाः २५ प्राचीनबर्हिर्वृद्धिहा पृतनाषाट् पुलोम
जित् उग्रधन्वा च तस्य तु प्रिया पुलोमजा शचीन्द्राणी २ नगरी त्वमरावती हय उच्चैःश्रवा : १
सूतो मातलिः १ नन्दनं वनं स्यात्प्रासादो वैजयन्तः १ जयन्तः पाकशासनिः २ ऐरावतोऽभ्र
मातङ्गैरावणाभ्रमुवल्लभाः ४ सुरगजो गजमल्लः ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ९ व्योमयानं विमानोऽस्त्री १ नारदाद्याः सुरर्षयः १
स्यात्सुधर्मा देवसभा १ पीयूषममृतं सुधा ३ मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ४ सि
द्धक्षिप्र मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ५ पञ्चैते देवतरवो मन्दारः पारिजातकः संता
नः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ५ सनत्कुमारो वैधात्रः २ स्वर्वैद्यावश्विनीसुतौ नासत्या

अ॰ को॰ ४

5

वा श्विनैदस्रावाश्विनेयौचतावुभौ ९ स्त्रियांबहुष्वप्सरसः सर्वैश्याउर्वशीमुखाः घृताचीमेन
कारंभाउर्वशीचतिलोत्तमा सुकेशीमंजुघोषाद्या कथ्यंतेप्सरसोबुधैः हाहाहूहूश्चैवमाद्या।
गंधर्वास्त्रिदिवौकसाम् २ अग्निर्वैश्वानरोवह्निर्वीतिहोत्रोधनंजयः कृपीटयोनिर्ज्वलनोजा
तवेदास्तनूनपात् वर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केशउषर्बुधः आश्रयाशोबृहद्भानुः
कृशानुः पावकोनलः रोहिताश्वोवायुसखः शिखावानाशुशुक्षणिः हिरण्यरेताहुत
भुग्दहनोहव्यवाहनः सप्तार्चिर्दमुनाः शुक्रः चित्रभानुर्विभावसुः शुचिरप्पित्तम् ३४ उ
दर्चिश्च क्षारस्तुभस्मभसितम् और्वस्तुवाडवोवडवानलः २ वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हे
तिः शिखास्त्रियाम् ५ त्रिषुस्फुलिंगोग्निकणः २ संतापः संज्वरः समौ २ धर्मराजः पितृ
पतिः समवर्तीपरेतराट् कृतान्तोयमुनाभ्राता शमनोयमराड्यमः कालोदंडधरः श्राद्धदे
वोवैवस्वतोंतकः प्रेताधिपः पाशहस्तः कीनाशोमस्त्वर्कजः ५९ राक्षसः कौणपः क्रव्या

क्रव्यादोऽस्रपआशरः रात्रिचरोरात्रिचरः कर्बुरोनिकषात्मजः यातुधानः पुण्यजनोनैर्ऋतो
यातुरक्षसी १५ विश्वरोऽपि प्रचेतावरुणः पाशीयादसांपतिरप्पतिः ५ श्वसनः स्पर्शनोवायु
र्मातरिश्वासदागतिः प्रचेतावरुणः पाशीयादसांपतिरप्पतिः पृषदश्वोगंधवहोगंधवा
हानिलाशुगाः समीरमारुतोमरुज्जगत्प्राणसमीरणाः नभस्वद्वातपवनपवमानप्रभंज
नाः प्रकंपनश्चसमिरो २२ झंझावृष्ट्याऊलोमहान् । हृत्पायुनाभिकंठांतसर्वसंधिगताः
क्रमात् प्राणापानसमानोदानव्यानाः पंचवायवः शरीरस्थाइमे ५ रंहस्तरसीतुरयः
स्यदः जवःवाजोवेगश्च अथशीघ्रंत्वरितं लघुक्षिप्रमरंद्रुतम् सत्वरंचपलंतूर्णमविलं
बितमाशुच ॥ सततानारताश्रांतसंततविरतानिशम् नित्यानवरताजस्रमपि ४ अथा
तिशयोभरः अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् तीव्रैकांतनितांतानिगाढबाढदृढा
निच ४ क्लीवेशीघ्राद्यसत्वेस्यात्रिष्वेषांसत्वगामियत् कुबेरस्त्र्यंबकसखोयक्षराड्गुह्यकेश्वरः

मनुष्यधर्माधनदोराजराजोधनाधिपः किन्नरेशोवैश्रवणः पौलस्त्योनरवाहनः यक्षैकपिंगैलवि

अ॰ लश्रीदपुण्यजनेश्वरः १ अस्योद्यानंचैत्ररथः । पुत्रस्तुनलकूबरः । कैलासःस्थानं । अल

को काषूः । विमानंतुपुष्पकम् । स्यात्किन्नरःकिंपुरुषस्तुरंगवदनोमयुः ४ निधिर्नाशेव

५ र्भेदाः शंखपद्मादयोनिधेः निधिभेदाः मुकुंदश्च महापद्मश्चपद्मश्चशंखोमकरकच्छपौ मुकुंद

कुंदनीलश्चखर्वश्चनिधयोनव निधयः ४ इतिअमरकोशेस्वर्गादिकांडेस्वर्गवर्गःप्रथमः १

द्योदिवौद्वेस्त्रियामभ्रंव्योमपुष्करमंबरम् नभोन्तरिक्षंगगनमनंतंसुरवर्त्मखम् वियद्वि

ष्णुपदंवातुपुंस्याकाशविहायसी ।९ विहायसोपिनाकोपिद्युरपिस्यात्तदव्ययम् तारापथो

श्चमेघाध्वांतरिक्षंमहाबिलम् २४ दिशस्तुककुभःकाष्ठाआशाश्चहरितश्चताः ५ प्राच्य

वाचीप्रतीच्यस्ताःपूर्वदक्षिणपश्चिमाः २ उत्तरादिगुदीचीस्यात् । दिश्यंतुत्रिषुदिग्भवे । इंद्रो

वह्निःपितृपतिर्नैरृतोवरुणोमरुत् कुबेरईशःपतयःपूर्वादीनांदिशांक्रमात् ६ ऐरावतःपुं

डरीकोवामनः कुमुदोंजनः पुष्पदंतः सार्वभौमः सुप्रतीकश्चदिग्गजाः ८ क्लीबेव्ययंत्वपदिशं
दिशोर्मध्येविदिकस्त्रियां अभ्यंतरंत्वंतराले २ चक्रवालंतुमंडलम् २ अभ्रंमेघोवारिवाहः स्तन
यित्नुर्बलाहकाः धाराधरोजलधरः तडित्वान्वारिदोंबुभृत् घनजीमूतमुदिरजलमुग्धूमयोन
यः १५ कादंबिनीमेघमाला १ त्रिषुमेघभवेभ्रियम् १ स्तनितंगर्जितंमेघनिर्घोषेरसिच ४।
शंपाशतह्रदाह्रादिन्यैरावत्याक्षणप्रभा तडित्सौदामिनीविद्युच्चंचलाचपलापिच १० स्फूर्जथु
र्वज्रनिर्घोषे १ मेघज्योतिरिरंमदः २ इंद्रायुधंशक्रधनुः २ तदेवऋजुरोहितम् १ वृष्टिर्वर्षं २
तद्विघातेवग्राहावग्रहौसमौ २ धारासंपातआसारः शीकरोंबुकणाः स्मृतः १ वर्षोपलस्तु
करकः २ मेघछन्नेह्निदुर्दिनम् वार्मलंच अंतर्धाव्यवधापुंसित्वंतर्धिरपवारणम् अपिधान
तिरोधानपिधानाछादनानिच ८ हिमांशुश्चंद्रमाश्चंद्रइंदुःकुमुदबांधवः विधुःसुधांशुःशुभ्रां
शुरोषधीशोनिशापतिः अब्जोजैवातृकःसोमोग्लौर्मृगांकःकलानिधिः द्विजराजःशशधरोन

क्षत्रेशः क्षपाकरः रोहिणीशः सुधासूतिरात्रेयोस्रात्तनिर्गमः समुद्रनवनीतं कलातुषोडशोभा

अ॰ गः १ बिंबोऽस्त्रीमंडलंत्रिषु २ भित्तंशकलखंडेवापुंस्यर्धो ४ र्धंसमेंशके १ भागाद्धेत्र च चंद्रि

को॰ काकौमुदीज्योत्स्ना ३ प्रसादस्तुप्रसन्नता नैर्मल्यंच कलंकांकौलांछनंचचिह्नंलक्ष्मचलक्षणं

९ ९ अभिख्यानेचवंसुषमापरमाशोभाशोभा १ शोभाकांतिर्द्युतिश्छवि ४ अवश्यायस्तुनीहारः।

6 स्तमहिषीरुमिकाच तुषारस्तुहिनंहिमम् प्रालेयंमिहिकाचा ५ थहिमानीहिमसंहतिः २

शीतंगुणेतद्वदर्थाः सुषीमःशिशिरोजडः तुषारःशीतलःशीतोहिमःसमान्यलिंगकाः १

ध्रुवऔत्तानपादिःस्यात् २ अगस्त्यःकुंभसंभवःमैत्रावरुणिः ३ अस्यैवलोपामुद्रासधर्मिणी

नक्षत्रमृक्षंभंताराताराकाप्युडुवास्त्रियाम् ९ दाक्षायण्योश्विनीत्यादितारा अश्वयुगश्विनी राधा

विशाखा २ पुष्येतुसिध्यतिष्यौ ३ श्रविष्ठया समाधनिष्ठास्युः प्रोष्ठपदाभद्रपादाःस्त्रियः २ मृगशी

र्षंमृगशिरस्तस्मिन्नेवाग्रहायणी ३ इल्वकास्तच्छिरोदेशेतारकानिवसंतियाः १ रविश्शक्रोमहीसु

नमसोवैभानजोव्रजः बुधाबृहस्पतिश्चैतेदिशासेतेनथाग्रहाः बृहस्पतिः सुराचार्योगीर्व
तिर्धिषणोगुरुः जीवअंगिरसोवाचस्पतिश्चित्रशिखंडिजः ९ शुक्रोदैत्यगुरुःकाव्यउशना
भार्गवःकविः ९ अंगारकः कुजोभौमोलोहितांगोमहीसुतः ५ वक्रआरश्च रौहिणेयो
बुधः सौम्यः तश्चांद्रिर्विज्ञ सौमासौरशनैश्चरौ शनिर्मंदोपंगुकालोछायापुत्रोसितश्चमः ८
तमस्तुराहुः स्वर्भानुः सैंहिकेयोविधुंतुदः ५ अभ्रपिशाचोग्रहकल्लोलश्च केतुःशिखीस्मा
न्मर्धयोमरीचत्रिमत्ताश्चित्रशिखंडिनः २ राशीनामुदयोलग्नं १ तेतुमेषवृषादयः सूरसू
र्यार्यमादित्यद्वादशात्मदिवाकराः भास्कराहस्करब्रध्नप्रभाकरविभाकराः भास्वद्विवस्वत्स
प्ताश्वहरिदश्वोष्णरश्मयः विकर्तनार्कमार्तंडमिहिरारुणपूषणः द्युमणिस्तरणिर्मित्रश्चि
त्रभानुर्विरोचनः विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः भानुर्हंसः सहस्रांशुस्तपनःसवि।
तारविः कर्मसाक्षीजगच्चक्षुरंशुमालीत्रयीतनुः प्रद्योतनोदिनमणिः खद्योतोलोकबांधव :

स्व॰
कां॰
१

सूरोपिस्याद्धामनिधिः पद्मिनीकांतइत्यपि ४९ द्यामणिरंबरमणिः हेलिश्च माठरः पिंगलो

दंडश्चंडांशोः पारिपार्श्विकाः ३ सूरसूतोरुणोनूरुः काश्यपिर्गरुडाग्रजः ५ परिवेषस्तुपरिधि

रुपसूर्यकमंडले किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः भानुःकरोमरीचिः स्त्रीपुंसयो

र्दीधितिःस्त्रियाम् ११ स्युःप्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः रोचिःशोचिरुभेक्लीबे ॥

प्रकाशोद्योतआतपः ३ कोष्णंकवोष्णंमंदोष्णंकदुष्णंत्रिषुतद्वति ४ तिग्मंतीक्ष्णं

खरंतद्वत् ३ मृगतृष्णामरीचिका २ इत्यमरकोशेस्वर्गादिकांडेव्योमादिवर्गोद्वितीयः २

कालोदिष्टोप्यनेहापिसमयोपि ४ अथपक्षतिः प्रतिपद्द्वेइमेस्त्रीत्वे २ तदाद्यास्तिथयोद्वयो

र्घस्रोदिनाहनीवातुक्लीबेदिवसवासरौ ५ प्रत्यूषोहर्मुखंकल्यमुषःप्रत्यूषसीअपि व्युष्टंविभा

तंगोसर्गः प्रातश्चैवप्रगेव्ययम् प्रभातेच ११ दिनान्तेतुसायं १ संध्यापितृप्रसूः २ प्राह्णापरा

ह्णमध्याह्नास्त्रिसंध्यं १ अथशर्वरीनिशानिशीथिनीरात्रिस्त्रियामाक्षणदाक्षपा विभावरीतम

स्त्रियां रजनी यामिनी तमी १५ तमाउघापि तमिस्रा तामसी रात्रिः १ ज्यौत्स्नी चंद्रिकयान्विता १
आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी १ गणरात्रं निशा बह्व्यः १ प्रदोषो रजनीमुखं २
अर्धरात्रनिशीथौ द्वौ २ द्वौ यामप्रहरौ समौ २ स पर्वसंधिः प्रतिपत्पंचदश्योर्यदंतरम् पक्षांतौ
पंचदश्यौ द्वे २ पौर्णमासी तु पूर्णिमा २ कलाहीने सानुमतिः २ पूर्णे राका निशाकरे १ अमा
वस्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ४ सा दृष्टेन्दुः सिनीवाली २ सा नष्टेन्दुकला कुहूः १ उपरागो
ग्रहो २ राहुग्रस्ते त्विन्दौ च पूष्णि च सोपप्लवोपरक्तौ द्वौ अग्न्युत्पात उपाहितः २ एकयोक्त्या पुष्पवं
तौ दिवाकरनिशाकरौ १ अष्टादश निमेषास्तु काष्ठा १ त्रिंशत्तु ताः कलाः १ तास्तु त्रिंशत्क्ष
णः १ ते तु मुहूर्तो द्वादशास्त्रियाम् १ ते तु त्रिंशदहोरात्रः १ पक्षस्ते दशपंच च १ पक्षौ पूर्वाप
रौ शुक्लकृष्णौ २ मासस्तु तावुभौ १ द्वौ द्वौ माघादिमासौ स्यादृतुः १ तैरयनं त्रिभिः १ अयने
द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः १ समरात्रिंदिने काले विषुवं विषुवच्च तत् २ पुष्पयुक्ता पौर्णी

अ
को
१
8

मासी यापौषीमासी तु यत्र सा नाम्ना स पौषः १ माघाद्याश्चैवमेकादशापरे मार्गशीर्षे सहा मार्ग आग्रहा
यणिकश्च सः ४ पौषे तैषसहस्यौ द्वौ ३ तपः माघे २ अथ फाल्गुणे स्यात्तपस्यः फाल्गुणिकः ३ स्या
च्चैत्रे चैत्रिको मधुः ३ वैशाखे माधवो राधः ३ ज्येष्ठे शुक्रः २ शुचिस्त्वयमाषाढे २ श्रावणे तु स्यान्न
भाः श्रावणिकश्च सः ३ स्युर्नभस्यः प्रोष्ठपद भाद्र भाद्रपदाः समः ४ स्यादाश्विन इषोप्याश्वयुजोपि २
स्यात्तु कार्तिके बाहुलोर्जौ कार्तिकिको ४ हेमंतः शिशिरोस्त्रियाम् २ वसंते पुष्पसमयः सुरभिः ३
फल्पश्च ग्रीष्म ऊष्मकः निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ७ स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः २
अथ शरत्स्त्रियाम् १ षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ऋतवः ६ संवत्सरो वत्सरोब्दो
हायनोस्त्री शरत्समाः ६ मासेन स्यादहोरात्रः पैत्रः १ वर्षेण दैवतः १ दैवे युगसहस्रे द्वे ब्राह्मः १ कल्पौ
तु तौ नृणाम् १ मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्य
पि ५ संहारोप्युगान्तयः परिवर्तश्च अस्त्री पंकं पुमान्पाप्मा पापं किल्बिषकल्मषम् कलुषं वृजि

नैनोवमंहोदुरितदुष्कृतम् किल्बिमलस्त्र स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतंवृषः ५ मुत्
प्रीतिप्रमदोहर्षः प्रमोदामोदसम्मदः स्यादानन्दथुरानन्दः शर्मसातसुखानिच ८ श्वः
श्रेयसंशिवंभद्रंकल्याणंमंगलंशुभम् भावुकंभविकंभव्यंकुशलंक्षेममस्त्रियां शस्तंच ११
प्रशस्तंनिःश्रेयसंसूनृतंच अथत्रिषुद्रव्येपापपुण्यसुखादिच मतल्लिकामचर्चिकाप्रकां
डमुद्धतल्लजौप्रशस्तवाचकान्यमूनि ५ अयःशुभावहोविधिः १ दैवंदिष्टंभागधेयंभाग्यंस्त्री
नियतिर्विधिः ९ प्राक्कर्मवीजंयद्यस्यभविष्यद्भवितव्यता हेतुर्नाकारणंवीजं २ निदा
नंत्वादिकारणम् २ क्षेत्रज्ञआत्मापुरुषः ३ प्रधानंप्रकृतिःस्त्रियाम् २ विशेषःकालि
कोवस्थागुणाःसत्वंरजस्तमः ३ जनुर्जननजन्मानिजनिरुत्पत्तिरुद्भवः ९ प्राणीतु
चेतनोजन्मीजन्तुजन्युशरीरिणः ९ जातिर्जातंचसामान्यं ३ व्यक्तिस्तुपृथगात्मता वि
त्तंतुचेतोहृदयंस्वान्तंहृन्मानसंमनः १ इतिअमरकोशेस्वरादिकाण्डेकालवर्गःतृतीयः ३

बुद्धिर्मनीषाधिषणाधीः प्रज्ञाशेमुषीमतिः प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः धी।
र्धारणावतीमेधा १ संकल्पः कर्ममानसम् १ विकल्पश्च चित्ताभोगोमनस्कारः २ समाधा
अ॰ को॰ ५ नमवधानंप्रणिधानंच चर्चासंख्याविचारणा ३ विचारोविमर्शोभावनावासनासंस्कारश्च
9 अध्याहारस्तर्कऊहः ३ विचिकित्सातुसंशयः संदेहद्वापरौच ४ अथ समौनिर्णयनिश्चयौ २
मिथ्यादृष्टिर्नास्तिकता २ व्यापादोद्रोहचिंतनम् १ समौसिद्धांतराद्धांतौ २ भ्रांतिर्मिथ्यामति।
र्भ्रमः ३ संविदागूः प्रतिज्ञाननियमाश्रवसंश्रवाः अंगीकाराभ्युपगमप्रतिश्रवसमाधयः ९
मोक्षेधीर्ज्ञानं १ अन्यत्रविज्ञानंशिल्पशास्त्रयोः १ मुक्तिकैवल्यनिर्वाणश्रेयोनिःश्रेयसा
मृतम् मोक्षोपवर्गः ८ अथाज्ञानमविद्याहंमतिःस्त्रियाम् २ रूपंशब्दोगंधरसस्पर्शाश्चवि।
षयाअमी गोचराइंद्रियार्थाश्च २ हृषीकंविषयीन्द्रियम् ३ कर्मेंद्रियंतुपाय्वादि १ मनोने
त्रादिधीन्द्रियम् १ तुवरस्तुकषायोस्त्री २ मधुरोलवणःकटुस्तिक्तोम्लश्चरसाःपुंसि ५

तद्वत्सप्तदशमीत्रिषु १ विमर्दोत्थे परिमलो गंधे जनमनोहरे १ आमोदः सोतिनिर्हारी २ वाच्यलिं
गत्वमागुणात् समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः ४ इष्टगंधः सुगंधिः स्यादामोदी मुखव
वासनः २ पूतिगंधिस्तु दुर्गंधिः २ विस्रं स्यादामगंधियत् १ शुक्लशुभ्रशुचिश्वेतविशदश्ये।
तपांडुराः अवदातः सितो गौरोवलक्षो धवलोर्जुनः हरिणः पांडुरः पांडुः १८ ईषत्पांडुस्तु धूसरः २
कृष्णनीलासितश्यामकालश्यामलमेचकाः १ पीतो गौरो हरिद्राभः ३ पलाशो हरितो हरि
त् ३ लोहितो रोहितो रक्तः शोणः कोकनदछविः ५ श्यावः स्यात्कपिशोः २ धूम्रधूमलौ।
कृष्णलोहिते २ कडारः कपिलः पिंगः पिशंगः कद्रुपिंगलौ अवश्च चित्रं किर्मीरकल्माषश
बलैताश्च कर्बुरे ९ गुणाः शुक्लादयः पुंसि गुणिलिंगास्तु तद्वति इति अमरकोशे स्वर्गादिकांडे धी
वर्गः चतुर्थः ४ ॐ ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती व्याहार उक्तिर्लपितं भाषितं व
चनं वचः ९ अपभ्रंशो अपशब्दः स्यात् २ शास्त्रे शब्दस्तु वाचकः १ तिङ्सुबंतचयो वाक्यं क्रिया वा का

रकान्विता श्रुतिः स्त्रीवेदआम्नायस्त्रयी ४ निगमः त्रयीधर्मस्तु तद्विधिः १ स्त्रियामृक्सामयजुषी
इतिवेदास्त्रयस्त्रयी ४ शिक्षेत्यादिश्रुतेरंगं १ ॐकारप्रणवौसमौ इतिहासः पुरावृत्तं २ उदात्ताद्यास्त्र
यः स्वराः आन्वीक्षकीदंडनीतिस्तर्कविद्यार्थशास्त्रयोः २ आख्यायिकोपलब्धार्था १ पुराणंपंचलक्ष
णम् २ प्रबंधकल्पनाकथा प्रवह्लिकाप्रहेलिका २ सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच वंशानु।
वंशचरितंपुराणंपंचलक्षणम् स्मृतिस्तुधर्मसंहिता २ समाहृतिस्तुसंग्रहः २ समस्यातुसमासार्था २
किंवदंतीजनश्रुतिः वार्ताप्रवृत्तिर्वृत्तांतउदंतः स्यात् ४ अथाह्वयः आख्याह्वेअभिधानंचनामधेयंचना
मच ६ हूतिराकारणाह्वानं ३ संहूतिर्बहुभिःकृता १ विवादोव्यवहारः स्यात् २ उपन्यासस्तुवाङ्
मुखम् २ उपोद्घातउदाहारः २ शपनंशपथः पुमान् २ शपश्च प्रश्नोनुयोगः पृच्छाचप्रतिवाक्यो
त्तरेसमे २ मिथ्याभियोगोभ्याख्यानं २ अथमिथ्याभिशंसनम् अभिशापः प्रणादस्तुशब्दः स्यादनुरा
गजः १ यशः कीर्तिः समाज्ञाच ३ श्लोकोभिख्याच स्तवः स्तोत्रंनुतिः स्तुतिः ४ आम्रेडितंद्विस्त्रि

रुर्जे १ उच्चैर्घुष्टंतुघोषणा २ काकुःस्त्रियांविकारोयःशोकभीत्यादिभिर्ध्वनेः १ अवर्णाक्षेपनि
र्वादपरीवादापवादवत् उपक्रोशोजुगुप्साचकुत्सानिन्दाचगर्हणे १ पारुष्यमतिवादःस्यात् २
भर्त्सनंत्वपकारगीः २ यःसनिन्दउपालम्भस्तत्रस्यात्परिभाषणम् १ तत्रत्वाक्षारणायःस्यात् २
आक्रोशोमैथुनंप्रतिस्यादाभाषणमालापः २ प्रलापोनर्थकंवचः १ अनुलापोमुहुर्भाषा २ वि
लापःपरिदेवनम् २ विप्रलापोविरोधोक्तिः २ संलापोभाषणंमिथः १ संकथापिसुप्रलापःसुव।
चनम् अपलापस्तुनिह्नवः २ चोद्यमाक्षेपाभियोगौशापाक्रोशौदुरेषणा अस्त्रीचाटुचटुप्रेम्णा
श्लाघामिथ्याविकत्थनम् संदेशवाग्वाचिकंस्यात् २ वाग्भेदास्तुत्रिषूत्तरे रुशतीवागकल्याणी १ स्या
त्कल्यातुशुभात्मिका २ अत्यर्थमधुरंसान्त्वम् २ संगतंहृदयंगमम् १ निष्ठुरंपरुषं २ विक्रुष्टंच
ग्राम्यमश्लीले २ सूनृतंप्रियेसत्ये १ अथसंकुलक्लिष्टेपरस्परपराहते २ लुप्तवर्णपदंग्रस्तं १ निर
स्तंत्वरितोदितम् १ अम्बूकृतंसनिष्ठीवं २ अबद्धंस्यादनर्थकम् अनक्षरमवाच्यंस्यात् २ आहतंतुम

वार्थकं अथक्लिष्टमविस्पष्टं वितथं त्वनृतं वचः २ सोल्लुंठनं तु सोत्प्रासं मणितं रतिकूजितम् श्रव्यं
हृद्यं मनोहारि ३ विस्पष्टं प्रकटोदितम् सत्यं तथ्यमृतं सम्यक् ४ अमूनि त्रिषु तद्वति शब्दे निनादनि
अ॰ नदध्वनिध्वानरवस्वनाः स्वाननिर्ह्रादनिर्घोषनादनिस्वाननिस्वना आरवारावसंरावविरावाः ७ अ
को॰ थमर्मरः स्वनिते वस्त्रपर्णानां १ भूषणानां तु शिंजितम् १ निक्वाणो निक्वणः क्वाणः क्वणः क्वण
॥ मित्यपि ५ वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः कोलाहलः कलकलः तिरश्चां वाशितं
रुतं १ स्त्री प्रतिश्रुत्प्रतिध्वाने २ प्रतिश्रुत्का प्रतिध्वनिः गीतिस्त्रगेयं गांधर्वम् गीतं गानमिमे समे २
इत्यमरकोशे स्वरादिकांडे शब्दादिवर्गः पंचमः ५ ॐ निषादर्षभगांधारषड्जमध्यमधैवताः पंचमश्चे।
त्यमी सप्त तंत्रीकंठोत्थिताः स्वराः १ काकली तु कले सूक्ष्मे १ ध्वनौ तु मधुरास्फुटे कलः २ मंद्रस्तु गं
भीरे तारोऽत्युच्चैः १ त्रयस्त्रिषु समन्वितलयास्त्वेकतालः २ वीणा तु वल्लकी विपंची सा तु तंत्रीभिः
सप्तभिः परिवादिनी १ घोषवती च ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् १ वंशादिकं तु सुषि

रं १ कांस्यतालादिकंघनं १ चतुर्विधमिदंवाद्यंवादित्रातोद्यनामकम् २ मृदंगामुरजा २ भेदा

स्त्वंक्यालिंग्योर्ध्वकास्त्रयाः ३ स्याद्यशःपटहोढक्का २ भेरीस्त्रीदुंदुभिः पुमान् २ आनकः पटहो।

स्त्रीस्यात् २ कोणोवीणादिवादनम् वीणादंडः प्रवालःस्यात् २ ककुभस्तुप्रसेवकः २ कोलं

बकस्तुकायोस्याः १ उपनाहोनिबंधनंवाद्यप्रभेदाडमरुमड्डुडिंडिमझर्झरा मर्दलःपणवोन्येच

नर्तकीलासिकेसमे अतिलासिकाच विलंबितंद्रुतंमध्यंतत्त्वमेवोघनंक्रमात् ३ तालःका।

लक्रियामानंलयःसाम्यं २ अथास्त्रियांताण्डवंनटनंनाट्यंलास्यंनृत्यंचनर्तने काहलातूर्यभेदी

स्यात् १ मुखाद्याःपंचसंधयः १ तौर्यत्रिकंनृत्यगीतवाद्यंनाट्यमिदंत्रयम् २ भ्रुकुंसश्चभ्रुकुंसश्च

भ्रूकुंसश्चेतिनर्तकः स्त्रीवेषधारीपुरुषः ३ नाट्योक्तौगणिकाज्जुका २ भगिनीपतिरावुत्तः १ भावो

विद्वान् १ अथावुको मान्योभावेतिवक्तव्यः किंचिदूनस्तुमारिषः जनकः युवराजस्तुकुमारो

भर्तृदारकः ३ राजाभट्टारकोदेवः २ तत्सुताभर्तृदारिका १ देवीकृताभिषेकायाम् २ इतरासु

अ० को० १२
12

तुभट्टिनी १ अब्रह्मण्यमवध्योक्तौ १ राजश्यालस्तुराष्ट्रियः १ अम्बामाता २ अथबालास्याद्वासूः २
आर्यस्तुमारिषः मार्षश्च अत्तिकाभगिनीज्येष्ठा १ निष्ठानिर्वहणेसमे २ हण्डेहञ्जेहलाह्वानंनीचां
चेटींसखींप्रति ३ अङ्गहारोङ्गविक्षेपः २ व्यञ्जकाभिनयौसमौ २ निर्वृत्तेत्वङ्गसत्वाभ्यांद्वेत्रिष्वाङ्गि
कसात्विके २ शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः बीभत्सरौद्रौचरसाः ८ शृङ्गा
रःशुचिरुज्वलः ३ उत्साहवर्धनोवीरः २ कारुण्यंकरुणाघृणा कृपादयानुकंपाचअनुक्रोशो
पि ७ अथोहसः हासोहास्यंच ३ बीभत्संविकृतंत्रिष्विदंद्वयम् विस्मयोद्भुतमाश्चर्यंचित्रमपि
अथदारुणं भैरवंभीषणंभीष्मंघोरंभीमंभयानकम् भयंकरंप्रतिभयं ५ रौद्रंतूग्रं २ अमीत्रि
षु चतुर्दशदरस्त्रासोभीतिर्भीः साध्वसंभयम् ९ विकारोमानसोभावः १ अनुभावोभावबो
धकः २ गर्वोभिमानोहंकारो २ मानश्चित्तसमुन्नतिः अवलेपश्चममतादर्पोहंताभवेत् स्त्रियां
अनादरःपरिभवःपरीभावस्तिरस्क्रिया रीढावमाननावज्ञाअवहेलनमसूर्क्षणं ५ निकारोभि

भवः पराभवोन्यक्कारश्च मंदाक्षंह्रीस्त्रपाव्रीडालज्जा ४ सापत्रपान्यतः १ क्षांतिस्तितिक्षा २
क्षमासहनंच अभिध्यानंपरस्वविषयेस्पृहा १ अक्षांतिरीर्ष्या २ मात्सर्येच असूयान्तुदोषारो।
पोगुणेष्वपि १ वैरंविरोधोविद्वेषः ३ द्वेषश्च मन्युशोकौतुशुक्स्त्रियां ३ पश्चात्तापोनुतापश्च
विप्रतीसारइत्यपि ३ विप्रतिसारोनुशयश्च कोपक्रोधामर्षरोषाः प्रतिघोरुट्क्रुधौस्त्रियां ७ मा
नुश्च शुचौतुचरितेशीले १ चरित्रंचारित्रंच उन्मादश्चित्तविभ्रमः २ प्रेमानाप्रियताहार्दंप्रेमस्ने
हः ५ अथदोहदः इच्छाकांक्षास्पृहेहातृड्वांछालिप्सामनोरथः कामोभिलाषस्तर्षश्च १२ म
नोगवीच सात्यर्थेलालसाद्वयोः २ उपाधिर्नाधर्मचिंता १ पुंस्याधिर्मानसीव्यथा १ स्याच्चिंता
स्मृतिराध्यानं ३ उत्कंठोत्कलिकेसमे २ उत्साहोध्यवसायःस्यात् २ उद्योगोद्यमौचसवीर्यमति
शक्तिभाक् कपटोस्त्रीव्याजदंभोपधयश्छद्मकैतवे ८ कुसृतिर्निकृतिःशाठ्यं ३ कुतुकंचकुतूहलम्
कौतूहलंकौतुकंच ४ प्रमादोनवधानता १ स्त्रीणांविलासोविब्बोकोविभ्रमोललितंतथा हेलाले

श्री
को०
१२
13

लीत्यमीहावाः क्रियाः शृंगारभावजाः ९ लीलाविलासो विछित्तिर्विभ्रमः किलकिंचितम् मो
ट्टायितं कुट्टमितं विब्बोकं ललितं तथा विहृतं चेति मंतव्या दश स्त्रीणां स्वभावजाः प्रियस्यानुकृति
र्लीला श्लिष्टवागवेशचेष्टितैः विलासोऽंगविशेषोयः प्रियामासनतादिषु हर्षाद्रुदितगीतादिमि
श्रं किलकिंचितम् मोट्टायितं प्रियं स्मृत्वा सांगमहारं विजृंभणम् दुःखोपचारः सोऽप्येषि हर्ष
कुट्टमितं मतं विब्बोकोऽभिमतप्राप्तावपि गर्वादनादराः अनाचार्योपदिष्टं स्याल्ललितं रतिचेष्टितम्
वक्तव्यकाभाषणं व्याजाद्विहृतं दर्शितेंगितम् द्रवः केलिः परीहासः क्रीडा लीला च नर्म च व्याजोऽप
देशो लक्ष्यं च ३ वर्करोपि क्रीडा खेला च कूर्दनम् २ घर्मो निदाघः स्वेदः स्यात् प्रलयो नष्टचेष्टता १
अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ २ आवेगश्च स्यादाच्छुरितकं हासः सोत्प्रासः १ समनाक्
स्मितम् मध्यमं स्याद्विहसितं १ रोमांचो रोमहर्षणम् २ पुलको लोमविक्रिया च क्रंदितं रुदितं क्रुष्टं ३
जृम्भस्तु त्रिषु जृंभणं २ विप्रलंभो विसंवादो २ रिंखनं स्खलने समे २ स्यान्निद्राशयनं स्वापः स्वप्नः १२

संवेशः इत्यपि २ तंद्री प्रमीला २ भ्रुकुटिः भ्रूकुटिः भृकुटिः स्त्रियाम् अदृष्टिः स्यादसौम्येक्षिणि ।
संसिद्धिप्रकृती त्विमे स्वरूपं च स्वभावश्च निसर्गश्च ४ अथ वेपथुः कंपः २ अथ क्षण उद्धर्षो मह
उद्धव उत्सवः ५ इत्यमरकोशे स्वरादिकांडे नाट्यवर्गः षष्ठः ६ ॐ अधोभुवनपातालं बलिस
द्म रसातलम् नागलोकः ५ अथ कुहरं सुषिरं विवरं बिलम् छिद्रं निर्व्यथनं रोकं रंध्रं श्वभ्रं
वपा सुषिः ११ गर्तावटौ भुवः श्वभ्रे सरंध्रे सुषिरं त्रिषु । अंधकारोस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ५
तमिस्रा याच ध्वान्ते गाढेंधतमसम् । क्षीणेवतमसं । तमो विष्वक्संतमसं । नागाः काद्रवेयाः २
तदीश्वरः शेषोनंतः २ वासुकिस्तु सर्पराजः २ अथ गोनसे तिलित्सः स्यात् २ गोनासो वारिंडश्च
अजगरे शयुर्वाहस इत्युभौ २ अथ लक्ष्मकमंडलीच अलगर्दो जलव्यालः २ अलीगर्दस्त्वेके समौ रा
जिलडुंडुभौ २ मालुधानो मातुलाहिः २ निर्मुक्तो मुक्तकंचुकः २ सर्पः पृदाकुर्भुजगो भुजंगोहिर्भुजं
गमः आशीविषो विषधरः चक्री व्यालः सरीसृपः कुंडली गूढपाच्चक्षुःश्रवाः काकोदरः फणी दर्वीक

अ॰ को॰ १४ र्घपृष्ठो दंदशूको बिलेशया उरगः पन्नगो भोगी जिह्मगः पवनाशनः १५ ऊर्भीनसो लेलिहानः
कंचुकी राजसर्पकः भुजंगभुक् त्रिष्वाहेयं विषास्थ्यादि १ स्फटायां तु फणा द्वयोः २ दर्विः कायेलस्य
समौ कंचुकनिर्मोकौ २ अहित्वक् निर्लयनीच क्ष्वेडस्तु गरलं विषम् ३ गरश्च पुंसि क्लीबे च काकोल
14 कालकूटहलाहलाः सौराष्ट्रिकः शौल्किकेयः ब्रह्मपुत्रः प्रदीपनः दारदो वत्सनाभश्च विषभे
दाश्च मी नव ५ हालाहलं हालहलं च हालहलशब्दोऽपि संख्येन स्वकाव्ये स्थापितः विषवैद्यो जांगु
लिकः २ व्यालग्राह्याहितुंडिकः २ इत्यमरकोशे स्वर्गादिकांडे पातालभोगिवर्गोऽष्टमः १
ॐ स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् तद्भेदास्तपनावीचिमहारौरवरौरवाः संहारः
कालसूत्रं चेत्याद्याः ९ सत्वास्तु नारकाः १२ प्रेताः १ आतिवाहिकाः परेताश्च वैतरणी सिंधुः १ स्या
दलक्ष्मीस्तु निर्ऋतिः १ विष्टिराजूः कारणा तु यातना तीव्रवेदना ३ पीडा बाधा व्यथा दुःखममानस्य
प्रसूतिजम् स्यात्कष्टं कृच्छ्रमाभीलम् ३ त्रिष्वेषां भेद्यगामि यत् इत्यमरकोशे स्वर्गादिकांडे नरकव १४

गीः ॥ क्रमः ८ समुद्रोब्धिरकूपारः पारावारः सरित्पतिः उदन्वानुदधिः सिंधुः सरस्वान्सागरो
र्णवः रत्नाकरो जलनिधिः यादस्पतिरपांपतिः वीचिमालो नदीनाथो वारिराशिर्झषध्वजः ४ अ
वारपारः पाथोधिश्च तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे १ आपः स्त्री भूम्नि वार्वारि सलिलं
कमलं जलम् पयः कीलालममृतं जीवनं भुवनं वनम् कबंधमुदकं पाथः पुष्करं सर्वतोमुख
म् अंभोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् मेघपुष्पं घनरसः २७ दकंजीवनीयं च त्रिषु द्वे आ
प्यमम्मयम् २ भंगस्तरंग ऊर्मिर्वा स्त्रियां वीचिः ४ अथोर्मिषु महत्सूल्लोलकल्लोलौ २ लहरीत्रैव
तश्च स्यादावर्तोम्भसां भ्रमः २ पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः ४ चक्राणि पुटभेदा
स्युः २ भ्रमश्च जलनिर्गमः १ कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ५ पारावारे परार्वाची तीरे २
पात्रं तदन्तरं १ द्वीपोस्त्रियामन्तरीपं यदन्तर्वारिणस्तटं २ तोयोत्थितं तत्पुलिनं १ सैकतं सिकता
मयम् २ निषद्वरस्तु जम्बालः पंकोस्त्री शादकर्दमौ ४ जलोच्छ्वासाः परीवाहाः २ कूपकास्तु विदा

रकाः नाव्यं त्रिलिङ्गं नौतार्ये १ स्त्रियां नौस्तरणिस्तरिः ३ उडुपं तु प्लवः कोलः २ स्रोतोम्बुसरणं स्वतः।
अ॰ को॰ १५ 15 तः १ आतरस्तरपण्यं स्यात् १ द्रोणी काष्ठाम्बुवाहिनी १ सांयात्रिकः पोतवणिक् २ कर्णधारस्तु नावि
कः २ नियामकः पोतवाहः २ निर्यामाश्च कूपको गुणवृक्षकः नौकादण्डः क्षेपणी स्यात् २ अरित्रं के
निपातकं स्मृतं कोटिपात्रं च अभ्रिः स्त्री काष्ठकुद्दालः २ सेकपात्रं तु सेचनम् २ यानपात्रे तु पोतः २
त्रि
अभिभवे त्रिषु समुद्रियम् १ सामुद्रिको मनुष्यो वाब्धिभवः १ सामुद्रिका तु नौः १ क्लीबेऽर्धनावं नावोऽर्धे
अतीतनौकेऽतिनु त्रि १ त्रिष्वागाधात् प्रसन्नोऽच्छः २ कलुषोऽनच्छ आविलः निम्नं गभीरं गम्भीरं ३ उत्ता
नं तद्विपर्यये १ अगाधमतलस्पर्शं २ कैवर्ते दाशधीवरौ आनायः पुंसि जालं स्यात् २ शणसूत्रं पवित्रक
म् मत्स्याधानी कुवेणी स्यात् बडिशं मत्स्यवेधनम् २ पृथुरोमा झषो मत्स्यः मीनो वैसारिणोऽण्डजः विसा
रः शकली च ८ शल्की च अथ गडुकः शकुलार्भकः २ सहस्रदंष्ट्रः पाठीनः २ उलूपी शिशुकः समौ १
नलमीनश्चिलिचिमः २ प्रोष्ठी तु शफरी द्वयोः २ क्षुद्राण्डमत्स्यसंघातः पोताधानं २ अथो झषः रोहितो १५

मद्गुरः शालो राजीवः शकुलस्तिमिः तिमिंगिलादयः १ चाथयादांसि जलजंतवः २ तद्भेदाः शिशु

मारोद्रशंकवो मकरादयः ४ स्यात्कुलीरः कर्कटकः २ कूर्मे कमठकच्छपौ २ ग्राहोवहारः २ नक्र

स्तु कुंभीरः २ अथ महीलता गंडूपदः किंचुलकः ३ निहाका गोधिका समे २ रक्तपा तु जलौका

यां स्त्रीभूम्नि जलौकसः २ मुक्तास्फोटः स्त्रियां शुक्तिः २ शंखः स्यात्कंबुरस्त्रियौ २ क्षुद्रशंखाः शं

खनखाः २ शंबूका जलशुक्तयः २ भेके मंडूकवर्षाभूशालूरप्लवदर्दुराः ६ शिलीगंडूपदी २ भेकी

वर्षाभ्वी २ कमठीडुली २ कूर्मी च मद्गुरस्य प्रिया शृंगी १ दुर्नामा दीर्घकोशिका २ जलाशयो ज

लाधारः २ तत्रागाधजलो ह्रदः १ आहावस्तु निपानं स्यादुपकूपजलाशये २ पुंस्येवांधुः प्रहिः कूप उ

दपानं तु पुंसि वा ४ नेमिस्त्रिकास्य २ वीनाहो मुखबंधनमस्य यत् पुष्करिण्यां तु खातं स्यात् १

अखातं देवखातकं पद्माकरस्तडागोस्त्री कासारः सरसी सरः ५ वेशंतः पल्वलं चाल्पसरः २ वापी

तु दीर्घिका २ खेयं तु परिखा २ आधारस्त्वंभसां यत्र धारणं १ स्यादालवालमावालमावापः अथ नदी

ग्रं० को० १९ 16

सरित् तरंगिणीशैवलिनीतटिनीह्रादिनीधुनी स्रोतस्वतीद्वीपवतीस्रवंतीनिम्नगापगा कूलंकषानि
र्झरिणीरोधोवक्रासरस्वती गंगाविष्णुपदीजह्नुतनयासुरनिम्नगाभागीरथीत्रिपथगात्रिस्रोताभीष्मसू
रपि ६ कालिंदीसूर्यतनयायमुनाशमनस्वसा ४ रेवातुनर्मदासोमोद्भवामेकलकन्यका ४ कर
तोयासदानीरा २ बाहुदासैतवाहिनी २ अर्जुनीकथितासेवकांतवीर्यावतारिता शतद्रुस्तुशुतुद्रिःस्या
त् २ विपाशातुविपाट्स्त्रियाम् २ शोणोहिरण्यवाहःस्यात् २ कुल्याल्पाकृत्रिमासरित् १ शराव
तीवेत्रवतीचंद्रभागासरस्वती कावेरीसरितोन्याश्च ५ संभेदःसिंधुसंगमः द्वयोःप्रणालीपयसः
पदव्यां १ त्रिषुतूत्तरे देविकायांसरय्वांचभवेदाविकसारवौ २ सौगंधिकंतुकल्हारं २ हल्लकंरक्तसं
ध्यकं २ स्यादुत्पलंकुवलयं २ अथनीलांबुजन्मच इंदीवरंचनीलेस्मिन् २ सितेकुमुदकैरवे २ शा
लूकमेषांकंदःस्यात् १ वारिपर्णीतुकुंभिका जलनीलीतुशैवालंशैवलः ३ अथकुमुद्वतीकुमुदिन्यां २
नलिन्यांतुबिसिनीपद्मिनीमुखाः २ वापुंसिपद्मंनलिनमरविंदंमहोत्पलम् सहस्रपत्रंकमलंश

तपत्रं ऽशेशयम् पंकेरुहं तामरसं सारसी रुहम् विसप्रसूनराजीवपुष्कराभोरुहाणि च नालीकं

च पुंडरीकं सितांभोजे २ अथरक्तसरोरुहे रक्तोत्पलं कोकनदं ३ नालानालम् २ अथास्त्रियां

मृणालीलं विसम् २ अब्जादिकदंभे षंडमस्त्रियाम् १ करहाटः शिफाकंदं २ किंजल्कः केसरोऽस्त्रिया

म् २ संवर्तिकानवदले २ वीजकोशो वराटकः २ कर्णिकाच इत्यमरकोशे स्वर्गादिकांडे वारिव

र्गः नवमः ९ उक्तं स्वर्व्योमदिक् कालधीशब्दादि सनाट्यकम् पाताल भोगिनरकं वारिचैषांच सं

गतम् इतिनामलिंगानुशासने, मरसिंहविरचिते स्वर्गादिकांडः प्रथमः समाप्तः ॐ वर्गाः पृथ्वी

पुरक्ष्माभृद्वनौषधिमृगादिभिः न्वब्रह्मक्षत्रविट्शूद्रैः सांगोपांगैरिहोदितैः ॐ भूर्भूमिरचलानंतारसा

विश्वंभरा स्थिरा धराधरित्री धरणीः क्षोणीज्याकाश्यपी क्षितिः सर्वंसहा वसुमती वसुधोर्वी वसुंधरा

गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही स्तनधात्री रत्नगर्भा विपुला सागरांबरा रत्नवती भास्व

ती भगाजगती गौः क्षमा इलाच मृन्मृत्तिका २ प्रशस्ता तु मृत्स्ना मृत्सा च मृज्जिका २ उर्वरा सर्वसस्याढ्या १

स्यादूषः क्षारमृत्तिका २ ऊषवानूषरो द्वावप्यन्यलिंगौ २ स्थलंस्थली २ समानौमरुधन्वानौ २ द्वे।
अ॰ खिलाप्रहतेसमेत्रिषु २ योजगतीलोकोविष्टपंभुवनंजगत् लोकोयंभारतंवर्षं १ शरावत्यास्तुयो
को॰ वधेः देशः प्राग्दक्षिणः प्राच्यः उदीच्यः पश्चिमोत्तरः हिमवद्विंध्ययोरंतर्यत्प्राग्विनशनादपि प्र
१ त्यगेवप्रयागाच्चमध्यदेशः प्रकीर्तितः पर्यंतोम्लेच्छदेशः स्यात् २ मध्यदेशस्तुमध्यमः २ आर्या
17 वर्तः पुण्यभूमिर्मध्यंविंध्यहिमालयोः २ नीवृज्जनपदो २ देशविषयौतूपवर्तनम् ३ त्रिष्वागोष्ठात्
नडप्रायेनड्वान्नड्वलइत्यपि २ कुमुद्वाकुमुदप्राये २ वेतस्वान्बहुवेतसे १ शाद्वलः शादहरिते २
सजम्बालेतुपंकिलः जलप्रायमनूपंस्यात् १ पुंसिकच्छस्तथाविधः १ स्त्रीशर्कराशर्करिलः
शार्करः शर्करावति देशएवादिमा २ एवमुन्नेयाः सिकतावति ४ देशोनद्यम्बुवृष्ट्यम्बुसंपन्न
व्रीहिपालितः स्यान्नदीमातृकोदेवमातृकश्चयथाक्रमम् २ सुराज्ञिदेशेराजन्वान्स्यात् ततोन्य
त्रराजवान् १ गोष्ठंगोष्ठानकं २ तत्तुगौष्ठीनंभूतपूर्वकम् १ पर्यंतभूः परिसरः सेतुरालिः स्त्रियां १

पुमान् २ वाम्लूरश्च नाकुश्च वल्मीकं नपुंसकम् अयनं वर्त्म मार्गाध्वपंथानः पदवी सृतिः स
रणिः पद्धतिः पद्या वर्तन्येकपदीति च २ अतिपंथाः सुपंथाश्च सत्पथश्चार्चितेध्वनि ३ व्यध्वो दु
रध्वो विपथः कदध्वः कापथः समाः ४ अपंथास्त्वपथं २ तुल्ये शृंगाटकचतुष्पथे २ संस्थाने
चत्वरं च प्रांतरं दूरशून्योध्वा १ कांतारं वर्त्म दुर्गमम् १ गव्यूतिः स्त्री क्रोशयुगं २ नल्वः किष्कु
चतुः शतम् घंटापथः संसरणं २ तत्पुरस्योपनिष्करम् द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च
रोदसी दिवस्पृथिव्यौ गंजा तु रुमा स्यात् लवणाकरः ३ इत्यमरकोशे द्वितीयकांडे भूवर्गः प्रथ
मः १ पूः स्त्री पुरी नगर्यौ वा पत्तनं पुटभेदनम् स्थानीयं निगमाः अधिष्ठानं दुर्गकोट्टं राजधा
नी च अन्यत्तु यत् मूलनगरात्पुरम् तच्छाखानगरं १ वेशो वेश्याजनसमाश्रयः १ स्यात्साके
तमयोध्यायां २ विदेहे मिथिला पुरी २ महोदयः कान्यकुब्जः कन्यकुब्जं महोदयम् काशी वारा
णसी २ अवंती विशालायां उज्जयिन्यपि प्राग्ज्योतिर्षं कामरूपं द्वारका द्वारवत्यपि आपणस्तु नि

अ॰
को॰
१८
18

षद्यायां २ विपणिः पण्यवीथिका २ रथ्याप्रतोलीविशिखा ३ स्याच्चयो वप्रमस्त्रियाम् २ प्राकारो
वरणः सालः ३ प्राचीनं प्रान्ततो वृतिः वाटो वाटीश्चावेशकश्च भित्तिः स्त्री कुड्यं २ एडूकं यदन्तर्न्य
स्तकीकसम् १ गृहं गेहोदवसितं वेश्म सद्म निकेतनम् निशान्तपस्त्यसदनं भवनागारमन्दिरम्
गृहाः पुमांसो भूम्नि च निकायनिलयालयाः वासः कुटी द्वयोः शाला सभा ४ वसतिः वासवेश्म
निवेशनं चावसथः संस्थायश्च संजवनं त्विदं चतुः शालं मुनीनां तु पर्णशालोटजोऽस्त्रियाम् चैत्य
मायतनं तुल्ये २ स्तूपश्च वाजिशाला तु मन्दुरा २ आवेशनं शिल्पिशाला २ प्रपा पानीयशालि
का २ मठश्छात्रादिनिलयः २ बौद्धानां तु विहारोऽस्त्री सत्रशाला प्रतिश्रयः ३ गंजा तु मदिरागृह
म् गर्भागारं वासगृहं अरिष्टं सूतिकागृहम् २ कुट्टिमोऽस्त्री निबद्धा भूः चन्द्रशाला शिरोगृहम्।
वातायनं गवाक्षः २ अथ मण्डपोऽस्त्री जनाश्रयः २ हर्म्यादि धनिनां वासः प्रासादो देवभूभुजा
म् १ सौधोऽस्त्री राजसदनं उपकार्योपकारिका २ स्वस्तिकः सर्वतोभद्रो नंद्यावर्तादयोपि च विच्छं १८

दकप्रभेदाहिभवंतीश्वरसद्मनाम् स्त्र्यागारंभूभुजामंतःपुरंस्यादवरोधनम् शुद्धांतश्चावरोधश्च
स्यादट्टः क्षौममस्त्रियाम् २ प्रघाणप्रघणालिंदाबहिर्द्वारप्रकोष्ठके ३ गृहावग्रहणीदेहली २
अंगणंचत्वराजिरे ३ अधस्ताद्दारुणिशिला १ नासादारूपरिस्त्रियाम् २ प्रच्छन्नमंतर्द्वारंस्यात् १
पक्षद्वारंतुपक्षकः १ वलीकनीध्रेपटलप्रांते २ अथपटलंछदिः २ गोपानसीतुवलभीच्छाद
नेवक्रदारुणि १ कपोतपालिकायांतुविटंकंपुंनपुंसकम् १ स्त्रीद्वार्द्वारंप्रतीहारः ३ स्याद्वि
तर्दिस्तुवेदिका २ वेदेच तोरणोस्त्रीबहिर्द्वारं २ पुरद्वारंतुगोपुरम् १ कूटंपूर्द्वारियद्धस्तिनख
स्तस्मिन् १ अथत्रिषुकवाटमररंतुल्ये २ तद्विष्कम्भोर्गलंनना २ परवश्चआरोहणंस्यात्सोपा
नं २ निःश्रेणिस्त्वधिरोहिणी २ सम्मार्जनीशोधनीस्यात् २ रजोवारणीवहुकरीवर्धनीच
संकरोवकरस्तथाक्षिप्ते २ मुखंनिस्सरणं २ सन्निवेशोनिकर्षणः २ समौसंवसथग्रामौ २ इंगं
ग्रामदेरकंच वेश्मभूर्वास्तुरस्त्रियां २ ग्रामांतउपशल्यंस्यात् २ सीमसीमेस्त्रियामुभे २ घोषआभीर

पङ्क्तिः स्यात् २ पक्कणः शबरालयः इत्यमरकोशे द्वितीयकाण्डे पुरवर्गः द्वितीयः ॐ महीध्रशिख
रिक्ष्माभृदहार्यधरपर्वताः अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः १२ लोकालोकश्चक्रवालः १
अ॰ को॰ १९ 19 त्रिकूटस्त्रिककुत्समौ २ अस्तस्तु चरमः क्ष्माभृत् २ उदयः पूर्वपर्वतः २ हिमवान्निषधो विंध्यो माल्य
वान्पारियात्रकः गंधमादनमन्ये च हिमकूटादयो नगाः हिमालयोद्रिराजः स्यात् मलयश्चंदनाच
लः २ पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषत् १ कूटोस्त्री शिखरं शृंगं प्रपातस्त्वतटो भृगुः ३ क
टकोस्त्री नितम्बोद्रेः १ स्नुः प्रस्थः सानुरस्त्रियां ३ उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ५ दरी तु
कंदरो वा स्त्री २ देवखातबिले गुहा गह्वरं २ गंडशैलास्तु च्युताः स्थूलोपला गिरेः १ खनिः स्त्रिया
माकरः स्यात् २ खानिंजाच पादाः प्रत्यन्तपर्वताः २ उपत्यकाद्रेरासन्ना भूमिः १ ऊर्ध्वमधि त्य
का १ खानिंजाच पादाः प्रत्यन्तपर्वताः २ उपत्यकाद्रेरासन्ना भूमिः २ धातुर्मनःशिलाद्यद्रेः १
गैरिकं तु विशेषतः निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे २ इत्यमरकोशे द्वितीयकांडे शैलव १९

गत्वतीयः २ ॐ अटव्यरण्यं विपिनं गहनं काननं वनं ९ महारण्यमरण्यानी गृहारामास्तु निष्कुटाः २
अमात्यगणिकागेहोपवने वृक्षवाटिका १ आरामाः स्यादुपवनं कृत्रिमं वनमेव यत् पुमानाक्रीड
उद्यानं राज्ञः साधारणं वनम् २ स्यादेतदेव प्रमदावनमन्तःपुरोचितम् १ वेथ्यालिरावलिः पंक्तिः ५
श्रेणी लेखास्तु राजयः २ वन्या वनसमूहे स्यात् १ अंकुरोऽभिनवोद्भिदि १ मरोरुहस्वरुतो महीरुहः
अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः १३ अगनगौ च वानस्पत्यः फलैः पुष्पात् । नैरपु
ष्पाद्वनस्पतिः ओषधिः फलपाकान्ता १ स्यादवंध्यः फलेग्रहिः २ वंध्योफलोवकेशी च ३ फल
वान्फलिनः फली ३ प्राफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः फुल्लश्चैते विकसिते स्युः ८
अवंध्यादयस्त्रिषु स्थाणुरस्त्री ध्रुवः शंकुः २ ह्रस्वशाखाशिफः क्षुपः अप्रकांडे स्तम्भगुल्मौ २ व
ल्लीतु व्रततिर्लतिः २ लताप्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि ५ नगाद्यारोह उच्छ्राय उत्सेधश्चो
च्छ्रयश्च सः ३ अस्त्री प्रकांडः स्कंधः स्यान्मूलशाखावधिस्तरोः २ समे शाखालते २ शिफा च स्कंधशा

९ खाशालं २ शिफाजटे २ शाखाशिफावरोहः स्यान्मूलाच्चाग्रंगतालता १ शिरोग्रंशिखरंवाना २
मूलंबुध्नोंघ्रिनामकः सारोमज्जानरि २ त्वक्स्त्रीवल्कंवल्कलमस्त्रियाम् ३ काष्ठंदारु २ इन्धनंत्वेधइ
अ॰ ध्ममेधः समित्स्त्रियाम् ५ निष्कुहः कोटरंवाना २ वल्लरिर्मंजरिः स्त्रियाम् २ पत्रंपलाशंछदनंदलं
को॰ पर्णंछदः पुमान् ६ पल्लवोस्त्रीकिसलयं २ विस्तारोविटपोस्त्रियाम् २ वृक्षादीनांफलंसस्यं।
४९ वृंतंप्रसवबंधने। आमेफलेशलाटुःस्यात्। शुष्केवानम्। उभेत्रिषु क्षारकोजालकंक्लीबे २
20 कलिकाकोरकः पुमान् २ स्याद्गुच्छकस्तुस्तबकः २ कुड्मलोमुकुलोस्त्रियाम् २ स्त्रियःसुमनसः
पुष्पंप्रसूनंकुसुमंसुमम् ७ मकरंदःपुष्परसः २ परागःसुमनोरजः २ द्विहीनंप्रसवेसर्वंहरीतक्या
दयः स्त्रियाम्। आश्वत्थवैणवप्लाक्षनैयग्रोधैंगुदंफले ५ बार्हतंच। फलेजम्ब्वाजम्बूः स्त्रीजम्बु
जाम्बवम् ३ पुष्पेजातीप्रभृतयः स्वलिंगाः व्रीहयः फले विदार्याद्यास्तुमूलेपिपुष्पेक्लीबेपिपाट
ला वनवर्गः बोधिद्रुमश्चलदलः पिप्पलःकुंजराशनः अश्वत्थः ५ कोष्ठावासोमंगल्यःषणा ९०

मलयू अथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः तस्मिन्दधिफलः पुष्पफलदंतशठावपि ६
उदुंभरे जंतुफलो यज्ञांगो हेमदुग्धकः ४ कोविदारे चमरिकः कुद्दालो युगपत्रकः ४ सप्तपर्णो
विशालत्वक्शारदो विषमच्छदः ४ आरग्वधे राजवृक्षशम्पाकचतुरंगुलाः आरेवतव्याधि
घातकृतमालसुवर्णकाः ८ स्युर्जंभीरे दंतशठजम्भजंभीरजम्भलाः ५ वरुणो वरणः सेतु
स्तिक्तशाकः कुमारकः ५ पुन्नागे पुरुषस्तुंगः केसरो देववल्लभः ५ पारिभद्रे निंबतरुर्मंदारः
पारिजातकः ४ तिनिशे स्यंदनो नेमी रथद्रुरतिमुक्तकः ४ वंजुलश्चित्रकृच्चाथ द्वौ पीतनक
पीतनौ आम्रातके २ मधूके तु गुडपुष्पमधुद्रुमौ वानप्रस्थमधुष्ठीलौ ५ जलजेऽत्र मधूलकः १ पी
लुः गुडफलः स्रंसी तस्मिंस्तु गिरिसंभवे तु २ अक्षोटकंदरालौ द्वौ पर्वतीयश्च फलस्नेहो गुडा
शयः कैरेलः स्वादुमज्जाम्रवृक्षश्च अंकोटे तु निकोचकः २ पलाशे किंशुकः पर्णो वातपोथः ४
अथ वेतसे रथाभ्रपुष्पविदलशीतवानीरवंजुलाः द्वौ परिव्याधनिचुलौ नादेयी चांबुवेतसे २

अ॰ को॰ ४१
21

दीर्घवृन्तश्च शोभाञ्जने शिग्रुतीक्ष्णगंधकाक्षीवमोचकाः ५ रक्तोसौ मधुशिग्रुः स्यात् १ अरिष्टः
फेनिलः समौ २ बिल्वे शांडिल्यशैलूषौ मालूरश्रीफलावपि ५ प्लक्षो जटी पर्कटी स्यात् ३ न्यग्रो
धो बहुपाद्वटः ३ गालवः शावरो लोध्रस्तिरीटः तिल्वमार्जनौ ६ आम्रश्चूतो रसालः १ असौ स
हकारोतिसौरभः ५ कामाको मदिरासखः परपुष्टमहोत्सवः ३ कुंभोलूखलकं क्लीबे कौशि
को गुग्गुलुः पुरः ४ शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ५ राजादनं प्रियालः स्यात्सन्न
कद्रुर्धनुष्पटः ४ गंभीरी सर्वतोभद्रा काश्मरी मधुपर्णिका श्रीपर्णी मधुपर्णी च काश्मर्यश्चा
पि ७ अथ द्वयोः कर्कंधुः बदरी कोलिः ३ घोंटा ऊवलफेनिले सौवीरं बदरं कोलम् ८ अथ
स्यात्स्वादुकंटकः विकंकतः स्रुवावृक्षो ग्रंथिलो व्याघ्रपादपि ५ ऐरावतो नागरंगः २ नादेयी
भूमिजंबुका २ तिंदुकः स्फूर्जकः कालस्कंधश्च शितिसारके कार्केंदुः कुलकः काकतिंदुकः का
कपीलुके ४ गोलिहो झटलो घंटापाटलिर्मोक्षमुष्ककौ ८ तिलकः क्षुरकः श्रीमान् ३ समौ

पिचुलझाबुकौ २ श्रीपर्णिकुमुदिकाकुम्भीकैटर्यकट्फलौ ५ क्रमुकः पट्टिकाख्यः स्यात्पट्टी
लाक्षाप्रसादनः ४ तूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च तूलं च ८ नीपप्रियककदम्बास्तु ह-
लिप्रिये ४ वीरवृक्षोरुष्करोग्निमुखीभल्लातकी त्रिषु ४ गर्दभाण्डे कंदरालकपीतनसुपार्श्वकाः
न. प्लक्षः ५ तिंतिडी चिंचाम्लिका ३ अथो पीतनमालके सर्जकासनबंधूकपुष्पप्रियकजीवकाः ८
साले तु सर्जकार्श्याश्वकर्णकः सस्यसंवरः ४ नदीसर्जो वीरतरुरिंद्रद्रुः ककुभोर्जुनः राजादनं फल-
ध्यक्षः क्षीरिकायां ३ अथ द्वयोः इंगुदी तापसतरुः २ भूर्जे चर्मिमृदुत्वचौ पिच्छिला पूरणी मो-
चा स्थिरायुः शाल्मलिर्द्वयोः ४ पिच्छा तु शाल्मलीवेष्टे २ रोचनः कूटशाल्मलिः २ चिरबिल्वो
नक्तमालः करजश्च करंजकः ४ प्रकीर्यः पूतिकरजः पूतीकः कलिमारकः ४ करंजभेदाः ष-
ड्ग्रंथो मर्कट्यंगारवल्लरी ३ रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ४ रक्तप्रो रक्तो रक्तपुष्प
कश्च गायत्री बालतनयः स्यात् स्यात् खदिरो दंतधावनः ४ अरिमेदो विट्खदिरे २ कदरः खदिरे सिते

सोमवल्कोपि २ अथ व्याघ्रपुच्छगंधर्वहस्तकौ ऐरंड उरुवूकश्च रुचकश्चित्रकश्चंचुः पंचांगुला
मंडवर्धमानव्यडंबकाः ॥ अल्पा शमी शमीरः स्यात् । शमी सक्तुफला शिवा ३ पिंडीतको मरुव
कः श्वसनः करहाटकः शल्यश्च मदने ४ शक्रपादपः पारिभद्रकः भद्रदारु द्रुकिलिमं पी
तदारु च दारु च पूतिकाष्ठं च सप्त स्युर्देवदारुणि ५ अथ द्वयोः पाटलिः पाटलामोघा काचस्थाली
फलेरुहा कृष्णवृंता कुबेराक्षी ६ श्वेता स्यात्काष्ठपाटला । वसंतः कृतीतमवीकीतास्वथशंख
वासिनी कम्पाकी प्रियवल्ली च श्यामा तु महिलाह्वया लता गोवंधनी गुंद्रा प्रियंगुः फलिनी फली
७ विष्वक्सेना गंधवल्ली कारंभा प्रियकश्च सा मंडूकपर्णपत्रोर्णनटकट्वंगटुंटुकाः मधुरजंबीरल्ल
कः प्रियजीवश्च भल्लकः एकुशिम्बो जम्बुफलः मल्लको जंबुफलकः स्योनाकशुकनासर्क्षदीर्घ
वृंतकुटन्नटा शोणाकश्चारलः ८ तिष्यफलात्वामलकी त्रिषु अमृता च वयः स्था च जातीरस
फला शिवा ९ जीती रसं श्रीफलं च तिष्यं चामलकं फलम् विष्वक्सेना गंधफला कारंभः प्रिय

कावसा ४ संवर्त्तकस्तुवासंतः कक्षोह्यर्योविभीतकः नाक्षस्तुषाकर्षफलोभूतावासः।कलिद्रु

१० मः ५ अभयात्वव्यथाकापथ्याकायस्थापूतनामृता हरीतकीहैमवतीचेतकीश्रेयसीशि

वा ॥ पीतद्रुः सरलः पूतिकाष्ठं २ चाथद्रुमोत्पलः कर्णिकारः परिव्याधः २ लकुचोलिकु

चोडहुः ३ पनसः कंटकिफलः २ निचुलोहिज्जलोंबुजः ३ काकोदुंबरिकाफल्गुर्मलयूर्ज

घनेफला ४ फलभारीश्चित्रिपथ्यामराजीफलस्तुवाटिका ८ काश्मीरिकारस्मात्याचकपि

लास्याफलोत्तमा ३ उन्नारापथिकाद्राक्षाप्रियालमिलायसप्रिया ८ अरिष्टासर्वतोभद्रोहिंगु

निर्यासमालकाः पिचुमंदश्चनिम्बः ८ अथपिच्छिलामस्शिंशपाया २ कपिलाभस्मगर्भा

सा । शिरीषस्तुकपीतनः भंडिलः २ अथचाम्पेयश्चंपकोहेमपुष्पकः २ एतस्यकलिका

गंधफलीस्यात् । अथवाकेसरेबकुलः २ वंजुलोशोकः २ समौकरकदाडिमौ २ चाम्पेयः

केसरोनागकेसरः कांचनाह्वयः ४ जयाजयंतीतर्कारीनादेयीवैजयंतिका ५ श्रीपर्णमग्निमं

अ॰
को॰
२२
23

सिंदुवारेन्द्रसुरसौ निर्गुंडीन्द्राणिकेत्यपि ५ वेणीगरागरी देवताडो जीमूत इत्यपि॥

॰घः स्यात्कर्णिका गणिकारिका जयः ५ अथ कुटजः शक्रो वत्सको गिरिमल्लिका ४ एतस्यैव कलिं
गेन्द्रयवभद्रयवं फले २ कृष्णपाकफलाविग्नसुषेणाः करमर्दके ४ कालस्कंदस्तमालः स्यात्तापिं
छोपि ३ अथ सिंदुकः॥४ ओहस्तिनीत शरेंडी २ तृणशून्यात मल्लिका भूपदी शीतभीरुश्च ४ सैवा
स्फोटा वनोद्भवा १ शेफालिका तु सुवहा निर्गुंठी नीलिका च सा २ सितासौ श्वेतसुरसा भूतवेशी
अथ मागधी गणिका यूथिकाम्बष्ठा ४ सा पीता हेमपुष्पिका १ अतिपुंघाऽपुष्पगंधा गणोज्ज्वला
स्वर्णयूथी हरिणी च ५ अतिमुक्तः पुंड्रकः स्याद्वासंती माधवी लता सुमनाः मालती जातिः २
राजपुत्री प्रियंवदाल्पयगंधा तैलभाविनी च सप्तला नवमालिका २ माध्यं कुंदं २ रक्तकस्तु बं
धूको बंधुजीवकः ३ सहा कुमारी तरणिः ३ अम्लानस्तु महासहा महा २ तत्र शोणे कुरबकः
तत्र पीते कुरंटकः १ नीला झिंटी द्वयोर्बाणा दासी चार्तगलश्च सा ५ सैरेयिकस्तु झिंटी स्यात् १ त
स्मिन्कुरबकोऽरुणे १ पीते कुरंटके झिंटी १ तस्मिन्सहचरी द्वयोः १ ओड्रपुष्पं जपापुष्पं वज्रपुष्पं तिल २२

स्यन्दः प्रतिहासशतप्रासचंडातहयमारकाः करवीरे ५ करवीरेत्तरशकरस्पथिलावुभौ ३ उन्म

त्तः कितवोधूर्तोधत्तूरः कांचनाह्वयाः मातुलोमदनश्चा ७ स्यात्फलेमातुलपुत्रकः १ फलपूरो

बीजपूरो २ रुचकोमातुलुंगके ४ समीरणोमरुवकः प्रस्थपुष्पःफणिज्झकः जम्बीरोपि ५ ग्र

ग्रन्थपर्णीमेकठिंजरःकुठेरकौ ३ सितेकोत्र १ पाठीतुचित्रकोवह्निसंज्ञकः ३ अर्काह्ववसुकास्फो

टगणरूपविकीरणाः मंदारश्चार्कपर्णोत्रशुक्लेलर्कप्रतापसौ २ शिवमल्लीपाशुपतएकाष्ठीलो

बुकोवसुः ५ वंदावृक्षादनीवृक्षरुहाजीवंतिकेत्यपि ४ वत्सादनीछिन्नरुहागडूचीतंत्रिका(

मृता जीवंतिकासोमवल्लीविशल्यामधुपर्ण्यपि ४ मूर्वादेवीमधुरसामोरटातेजनीस्रवा

मधूलिकामधुमधुश्रेणीगोकर्णीपीलुपर्ण्यपि ९ पाठाम्बष्ठाविद्धकर्णीस्थापनीश्रेयसीरसाए

